Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

संस्कृत-
साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्कः : २३७
जान्युआरी - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

जीर्णं वस्त्रम्

कश्चित् वयोवृद्धः शिक्षकः मह्यं पत्रं प्रेषितवान्। सः लिखति – 'भवता क्रियमाणं संस्कृतकार्यं दिव्यम्। तत् नितरां वर्धताम् इति।' तथैव अपरः कश्चित् सज्जनः काले मां स्मरति, दूरवाण्या च कुशलं पृच्छति। केचन सुहृदः न केवलम् उपचारं कुर्वन्ति, अपि तु साहाय्यार्थं ते तत्पराः भवन्ति। बहवः सत्पुरुषाः तादृशाः अपि वर्तन्ते, ते कदापि वार्तालापं न कुर्वन्ति, किन्तु मयि 'गुप्तम्' स्निह्यन्ति। नानाक्षेत्रेषु अविरतं तपश्चर्यां कुर्वाणाः साधवः मम माङ्गल्यं कामयन्ते। अहम् एतत् सर्वम् आत्मश्लाघार्थं न वर्णयामि। अहं तु कश्चित् तुच्छः जन्तुः अस्मि। मयि न ज्ञानं वर्तते, न च विवेकस्य अङ्कुरः। नास्ति वाचि पटुता, न च वर्तने लालित्यम्। वस्तुतः एतत् सर्वं भगवता प्रेषितं वैभवम् एव। तस्य उपेक्षा न भवेत्। बहुमूल्यं यानम्, उन्नतं गृहम्, प्रसृतः अधिकारः इत्यादिकं क्षणिकं वैभवं सामान्याः जनाः अनुभवन्ति एव खलु। परन्तु एतत् सर्वम् अवधूय, केवलेन प्रीतिबलेन कश्चित् मनुष्यः आकृष्टः भवति चेत् चिन्तनीयम्, यत् इयं कृपा भगवता प्रेषिता।

कृष्णसुदाम्नोः कथां वयं शृणुमः। उदारः कृष्णः दरिद्रं ब्राह्मणं संस्मरति इत्येव तत्त्वम् इति वयं मन्यामहे। किन्तु तत् पर्याप्तं न। गुरुकुले बहवः छात्राः तादृशाः दरिद्राः स्युः। सुदामा एव किमर्थं कथायाः विषयः अभवत् ? सुदामा दरिद्रः सन् अपि सम्पन्नः आसीत्। तस्य सम्पत्तिं कृष्णः अवगन्तुं शक्नोति। पत्न्या बलात् प्रेषितः सुदामा कृष्णं धनं याचितुं न उत्सहते।

कश्चित् शिवभक्तः नित्यम् उपासनाम् अकरोत्। गृहे दरिद्रतायाः शासनं तपति स्म। उपासनाकाले भूमौ प्रसारयितुम् एकमात्रं जीर्णं वस्त्रम् आसीत् तस्य गृहे। तदेव तस्य वैभवम्। एकदा कश्चित् तेजस्वी संन्यासी गृहम् आगतः। सम्पन्ने आतिथ्ये संन्यासी भक्तम् अवदत् – 'भवान् न जानाति। यस्मिन् वस्त्रे उपविश्य भवान् ध्यानं करोति, तस्य अधः प्रभूतं धनं वर्तते। मम तपोबलेन भवान् तत् धनं प्राप्तुम् अर्हति। परन्तु तदर्थं भवता एतत् जीर्णं वस्त्रं मह्यं दातव्यम्।' वित्तप्राप्तेः सरलम् उपायं श्रुत्वा भक्तः प्रसन्नः। तस्य ललाटे तेजोरेखा प्रसृता। मनोरथानां चक्रेषु गतेः सञ्चारः इव अभवत्। परन्तु सः सहसा जागरितः। उक्तवान् च – 'स्वामिन्! क्षम्यताम्। जीर्णं वस्त्रम् एव मदीयं तात्त्विकं वैभवम्। अहम् एतत् वैभवं केनापि शुल्केन विक्रेतुं न इच्छामि।' परितुष्टः संन्यासी अपि प्रगाढे तिमिरे पूर्वाभिमुखं प्रस्थितः। तस्य तेजोमयानि पादचिह्नानि इतोऽपि प्रकाशन्ते स्म।

साक्ष्यम्

वल्लभनगरं किञ्चन वाणिज्यकेन्द्रम् । विविधेभ्यः देशेभ्यः जनाः तत्र आगच्छन्ति स्म वाणिज्यार्थम् । कदाचित् कश्चन दक्षिणदेशीयः तत्र आगतः । तस्य समीपे पञ्चशतं रूप्यकाणि आसन् । सः आवश्यकानां वस्तूनां क्रयणाय विपण्याम् अटन् आसीत् ।

तस्मिन् समये काचित् महिला अकस्मात् आगत्य तस्य हस्ते विद्यमानं धनम् अपहृतवती, तम् उक्तवती च – "मम रूप्यकाणाम् अपहरणं कृत्वा किं वाणिज्यं क्रियते भवता ?" इति ।

एतया घटनया दक्षिणदेशीयः आश्चर्येण स्तब्धः । सः ताम् अवदत् "मया भवत्याः धनं कदा अपहृतम् ? भवत्या एव मम धनं बलात् स्वीकृतम्" इति ।

तयोः विवादं श्रुत्वा जनाः तत्र सम्मिलिताः । कः असत्यं वदति इति निर्णेतुं न शक्तं तैः । अतः तत्र सम्मिलितेषु कश्चित् तौ अवदत् – "किम् अत्र स्थित्वा विवादेन ? न्यायालयः अनतिदूरे एव अस्ति । तत्र गच्छाम तावत्" इति ।

महिला एतत् अङ्गीकृत्य तेन दक्षिणदेशीयेन सह न्यायालयं गतवती । न्यायाधीशं दृष्ट्वा सा उक्तवती – "एषः जनः विपण्यां मत्तः पञ्चशतं रूप्यकाणि बलात् वशीकृतवान् । तत् धनं प्रत्यर्पयितुं न इच्छति एषः । तानि रूप्यकाणि प्रतिदापयतु कृपया" इति ।

प्रवृत्तं सर्वं श्रुत्वा न्यायाधीशः अपृच्छत् "किमत्र साक्ष्यं किमपि अस्ति ?" इति ।

"न" इति उक्तवती महिला ।

ततः न्यायाधीशः दक्षिणदेशीयम् अपृच्छत् – "एतद्विषये किं भवान् किमपि वक्तुम् इच्छति ?" इति । "महोदय ! कानिचन वस्तूनि क्रेतुम् अहम् अत्र आगतः । एषा महिला का इति मया न ज्ञायते । आगमनसमये मया पञ्चशतं रूप्यकाणि आनीतानि आसन् । एतत् धनं ममैव" इति अवदत् सः दक्षिणदेशीयः । 'महिला एव असत्यवादिनी' इति भावः न्यायाधीशस्य मनसि आगतः । वस्तुस्थितिं ज्ञातुं सः एकम् उपायं चिन्तितवान् । सः तं दक्षिणदेशीयम् अवदत् – "भवतः वचनं विश्वासार्हं न इति भाति मम । अतः एतत् धनं तस्याः एव" इति ।

सन्तुष्टा महिला धनं स्वीकृत्य ततः निर्गतवती ।

तस्याः निर्गमनस्य अनन्तरं न्यायाधीशः दक्षिणदेशीयम् अवदत् – "भवान् ताम् अनुसृत्य तस्याः धनग्रन्थिं वशीकरोतु । अग्रे किं करणीयम् इति अहं चिन्तयिष्यामि" इति ।

न्यायाधीशस्य कथनस्य अनुगुणं सः दक्षिणदेशीयः ताम् अनुसरन् गतवान् । सः महिलातः धनग्रन्थिं

स्वायत्तीकर्तुं पूर्णप्रयासं कृतवान्। तथापि तस्य प्रयासः विफलः। एतदभ्यन्तरे बहवः तत्र सम्मिलिताः।

सा महिला न्यायाधीशसमीपम् आगत्य अवदत् – "न्यायाधीशवर्य ! भवता यत् धनं दापितं तत् अपहर्तुम् इच्छति एषः। कृपया एषः दण्डनीयः" इति।

"किं भवती सत्यं वदति ? एषा घटना किं केनापि दृष्टा ?" इति अपृच्छत् न्यायाधीशः।

"अत्रत्याः सर्वे एतां घटनां दृष्टवन्तः एव। भवान् एतान् स्वयं प्रष्टुम् अर्हति" इति जनान् दर्शयन्ती अवदत् महिला। "प्रश्नस्य न कापि आवश्यकता। किं सः पुरुषः भवतीतः धनं स्वीकर्तुं शक्तः ?" इति अपृच्छत् न्यायाधीशः।

"कथं शक्नुयात् सः ? मया बलात् धनग्रन्थिः गृहीतः आसीत्। अतः तस्य स्वायत्तीकरणे विफलः जातः सः" इति साभिमानम् अवदत् महिला।

"ममापि तथैव भासते। भवतीतः धनं वशीकर्तुं सामर्थ्यं नास्ति एतस्य पुरुषस्य। पूर्वतने प्रसङ्गे भवती उक्तवती आसीत् यत् एतेन धनं वशीकृतम् इति। भवती शक्तिमती, स च दुर्बलः। अतः भवतीतः सः धनं वशीकृतवान् इत्येतत् असम्भवम्। भवती एव असत्यवादिनी। अतः भवती धनग्रन्थिं तस्मै प्रत्यर्पयतु। पुनरपि एतादृशः प्रयासः यदि भवत्या क्रियेत तर्हि भवती कठोरतया दण्ड्येत" इति अवदत् न्यायाधीशः।

अहो धूर्तता

हेमपुरस्य निवासी माधवः सामान्यपरिवारे जातः। किन्तु तस्य पत्नी नीरजा इच्छति स्म यत् मया वैभवोपेतं जीवनं यापनीयम्। कदाचित् नीरजायाः बन्धुगृहे प्रवर्तिष्यमाणस्य विवाहस्य निमित्तं निमन्त्रणं प्राप्तं माधवेन। नीरजायाः समीपे सुवर्णाभरणानि न आसन्। प्रतिवेशिनी श्यामला सदा सुवर्णाभरणानि धरति स्म। 'विवाहसमनन्तरम् एव प्रत्यर्पयिष्यामि' इति उक्तवा श्यामलातः कण्ठहारं प्राप्तवती नीरजा। महता आनन्देन सा आभरणानि धृत्वा बन्धुगृहस्य विवाहं प्रति गतवती। विवाहः समाप्तः। ततः सप्ताहः अतीतः अपि। तथापि तया श्यामलायाः कण्ठहारः न प्रत्यर्पितः। श्यामला अपि आभरणस्य प्रतिदानं न स्मारितवती।

दशानां दिनानाम् अनन्तरं कदाचित् नीरजा क्रोधपूर्णा सती श्यामलायाः गृहं गत्वा आभरणं सकोपं श्यामलायाः हस्ते निक्षिप्य "भवादृशी महावञ्चिका लोके अन्या न स्यात् एव। सुवर्णहारत्वेन निर्दिश्य कृत्रिमः हारः दत्तः भवत्या" इति अधिक्षिप्तवती।

एतत् श्रुत्वा श्यामला शान्तेन स्वरेणैव उक्तवती "हारः सुवर्णमयः इति मया न उक्तम्, अपि तु भवत्या तथा चिन्तितम्। मत्समीपे स्थितः हारः भवत्या पृष्टः, मया च दत्तः। तदस्तु, हारः कृत्रिमः इति भवत्या कथं ज्ञातम् ?" इति।

तदा नीरजा कोपमिश्रितेन एव स्वरेण अवदत् "धनस्य आवश्यकता आसीत् इत्यतः मया कुसीदवणिजः समीपं गतम्। तत्र कषेण घर्षणात् ज्ञातं यत् हारः सुवर्णमयः न इति" इति।

एतत् श्रुत्वा श्यामला आश्चर्येण स्तब्धा जाता।

Programme Schedule - 2026-27

Sr No	Month	Programme	Duration & Starting Date	Time	Day
1	Jan	स्तोत्रपाठः (निश्चितस्तोत्राणि)	05/01/26 to 30/01/26	07:00am to 08:30am	Monday-Wednesday Friday
2	Feb	संस्कृतभाषाशिक्षणम् (प्रथमः स्तरः)	02/02/26 to 24/04/26	06:30pm to 08:00pm	Monday-Wednesday Friday
3	Feb	संस्कृतभाषाशिक्षणम् (द्वितीयः स्तरः)	02/02/26 to 24/04/26	07:00am to 08:30am	Monday-Wednesday Friday
4	Mar	छन्दःपरिचयः	03/03/26 to 31/03/26	07:00am to 08:30am	Tuesday- Thursday
5	May	संस्कृतभाषाशिक्षणम् (प्रथमः स्तरः)	01/05/26 to 27/07/26	07:00am to 08:30am	Monday-Wednesday Friday
6	May	संस्कृतभाषाशिक्षणम् (द्वितीयः स्तरः)	01/05/26 to 27/07/26	06:30pm to 08:00pm	Monday-Wednesday Friday
7	May	ग्रीष्मवर्गः मार्गदर्शनम्(व्याकरणम्)(Cl.9,10) (with feedback) बालसंस्कृतवर्गः (Cl.1 to 8)	04/05/26 to 14/05/26	08:00am to 09:30am 10:00am to 11:30am	Daily Daily
8	June	Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Online/Offline	13/06/26 to 27/03/27	06:00pm to 07:30pm	Saturday
9	June	Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Offline	14/06/26 to 28/03/27	11:00am to 12:30am	Sunday
10	July	सन्धिः	02/07/26 to 30/07/26	07:00am to 08:30am	Tuesday- Thursday
11	Aug	संस्कृतभाषाशिक्षणम् (प्रथमः स्तरः)	03/08/26 to 23/10/26	06:30pm to 08:00pm	Monday-Wednesday Friday
12	Aug	संस्कृतभाषाशिक्षणम् (तृतीयः स्तरः)	03/08/26 to 23/10/26	07:00am to 08:30am	Monday-Wednesday Friday
13	Sept	Diploma in Sanskrit Teaching	03/09/26 to 10/06/27	06:00pm to 08:00pm	Tuesday- Thursday
14	Sep	Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Online for US/Canada	12/09/26 to 29/05/27	05pm (PST) 07pm (CST) 08pm (EST)	Friday
15	Oct	स्तोत्रपाठः (निश्चितस्तोत्राणि)	01/10/26 to 29/10/26	07:00am to 08:30am	Tuesday- Thursday
16	Nov	संस्कृतभाषाशिक्षणम् (चतुर्थः स्तरः)	02/11/26 to 29/01/27	07:00am to 08:30am	Monday-Wednesday Friday
17	Nov	संस्कृतभाषाशिक्षणम् (द्वितीयः स्तरः)	02/11/26 to 29/01/27	06:30pm to 08:00pm	Monday-Wednesday Friday
18	Nov	दीपावलीवर्गः मार्गदर्शनम् (व्याकरणम्) (Cl.9,10) बालसंस्कृतवर्गः (Skg to 8)	16/11/26 to 25/11/26	08:00am to 09:30am 10:00am to 11:30am	Daily Daily
19	Dec	Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Offline	05/12/26 to 27/03/27	06:00pm to 07:30pm	Saturday

- **For more information contact : Dr. Mihir Upadhyay Mobile: 98246 16237**

Core House, Off CG Road Ahmedabad 380 006 • www.eklavyasanskritacademy.org • E-mail: mihiresa@gmail.com

मासवार्त्ता:

सम्पन्नः 'संस्कृत-लिटरेचर फेस्टिवल' कार्यक्रमः ।

एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं, श्रीदिव्य-जीवन-सांस्कृतिकसङ्घः (शिवानन्द-आश्रमः), संस्कृत-साहित्य-अकादमी इत्येतेषां संयुक्तोपक्रमेण डिसेम्बरमासस्य १३, १४ दिनाङ्कयोः अमदावादनगरे शिवानन्द-आश्रमे सम्पन्नः भव्यः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः। एतस्य कार्यक्रमस्य चतुर्थ्याम् आवृत्त्यां संस्कृतसाहित्यम् अधिकृत्य विविधानि व्याख्यानानि आयोजितानि आसन् । आयोजनेऽस्मिन् 'न साहित्यं यन्न सानुबन्धम्' इति विषये स्वामी अक्षयानन्दः सरस्वती (महन्तः पीठाधीश्वरश्च, गङ्गासमदर्शनाश्रमः, उत्तरकाशी) 'संस्कृत साहित्य में आत्मबोध' इति विषये डॉ. भाग्येशः ज्हा (अध्यक्षः, गुजरात-साहित्य-अकादमी), 'संस्कृत साहित्य में जीवनमूल्य' इति विषये प्रा. सुकान्तकुमारः सेनापतिः (कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः) 'विदुरनीतिः Duty Awareness for Leaders and Public' इति विषये डॉ. ललितकमारः पटेलः (प्रधानाचार्यः, उमा आर्ट्स एन्ड नाथीबा महिला कोमर्स कॉलेज, गान्धिनगरम्), कौटिल्य-अर्थशास्त्र A Construct of the State' इति विषये श्रीमान् प्रणवः पटेलः (संस्थापकः, चाणक्य आन्वीक्षिकी प्रा.लि.), 'संस्कृत साहित्य में भक्ति' इति विषये डॉ. हर्षदेवः माधवः, श्रीमान् धवलकुमारः, सुश्री नेहा कृष्ण कुमार च, 'वेदों में संवादः' इति विषये डॉ. अमी जोशी (अध्यापिका, GCERT गान्धिनगरम्), 'विवेकचूडामणिः Samvad beyond Syllabus' इति विषये डॉ. ऊर्मिः सत्यन् दवे (अध्यापिका, PDEU), 'संस्कृत-पङ्क्तियाँ जो समग्र विश्वमें गूंजी' इति विषये डॉ. दीपेशः कतिरा (अध्यापकः, आई.आई.टी. खड़गपुर), 'भारतीयज्ञानपरम्परा – अस्मिता, स्रोत एवं मूल्य' इति विषये डॉ. शिवानी शर्मा (प्राध्यापिका, दर्शनविभागः पञ्जाबविश्वविद्यालयः) 'वेद का यथार्थ स्वरूप' इति विषये डॉ. ज्वलन्तकुमारः शास्त्री (संस्कृतविभागः, डॉ. राममनोहरलोहिया विश्वविद्यालयः, अयोध्या), 'भगवदज्जुकीयम्' इति विषये डॉ. महेशः पटेलः, 'गीतगोविन्दरसास्वादः' इति विषये सुश्री नेहा कृष्ण कुमारः च मनोहराणि व्याख्यानानि अकुर्वन्। अत्र उल्लेखनीयं यत् रात्रीकार्यक्रमे १३ दिनाङ्के भक्तकवि-जयदेव-विरचितम् 'गीतगोविन्दम्, नृत्यनाटिकायाः प्रयोगः, १४ दिनाङ्के महाकवि-बोधायन-विरचितं 'भगवदज्जुकीयम्' इति नाटकस्य प्रयोगः च अभवत् । कार्यक्रमेऽस्मिन् भागं स्वीकृत्य संस्कृतरसिकाः प्रसन्नाः आसन्।

कृपया हसन्तु

पतिः - (पत्नीम् उद्दिश्य) त्वं सर्वदा "मम... मम..." इति किमर्थं करोषि ? कृपया "अस्माकम" इति वद। अधुना कपाटिकायां कस्य अन्वेषणं करोषि ?

पत्नी - अस्माकं शाटिकायाः।

★ ★ ★ ★ ★

शिष्यः - (गुरुं प्रति) शीतकाले प्रातः शीघ्रम् उत्थानम् अतीव कष्टम्।

गुरुः - किमर्थम् ? किं जातम् ?

शिष्यः - शय्या मां गुरुः इव उपदिशति - "अधुना न उत्थातव्यम्" इति।

★ ★ ★ ★ ★



गुरुः - (छात्रान् उद्दिश्य) भोः छात्राः, शीतकालस्य लाभान् वदत।

प्रथमः - गुरो ! शीतकाले स्वेदः न भवति।

द्वितीयः - शीतकाले निद्रा मधुरा भवति।

तृतीयः - हे आचार्य ! शीतकाले विद्यालये अवकाशः अधिकः भवति।

गुरुः - एतत् किं शास्त्रम् ?

चतुर्थः - गुरो ! एतत् अनुभवशास्त्रम्।

★ ★ ★ ★ ★

पत्नी - (पतिम् उद्दिश्य) इतोऽपि कियत् खादिष्यति ?

पतिः - अहं न खादामि। स्वादः एव मां खादति।

सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः॥

तात्पर्यम् – मनुष्यस्य शीलमेव अत्यन्तं मुख्यम्। यस्य शीलं प्रणश्यति तस्य जीवनेन किमपि प्रयोजनं नास्ति। अपारेण धनेन, अनेकैः बन्धुभिः च तस्य किमपि प्रयोजनं नास्ति।

शुनः पुच्छमिव व्यर्थं जीवितं विद्यया विना।
न गुह्यगोपने शक्तं न च दंशनिवारणे॥

तात्पर्यम् – यः विद्यां न अध्येति तस्य जीवितं सफलं न भवति। तस्य जीवितं कुक्कुरस्य पुच्छम् इव भवति। कुक्कुरस्य पुच्छेन तस्य गुप्ताङ्गस्य आच्छादनं कर्तुं न शक्यते, अपि च कीटादीनां दंशनं च न वारयति।

शुभं ब्रूयात् प्रियं ब्रूयात् भद्रमितैव वा वदेत्।
शुष्कवैरं विवादं च न कुर्यात् केनचित् सह॥

तात्पर्यम् – सदैव उत्तमं प्रियं च वचनं वदेत्। मङ्गलमेव वक्तव्यम्। शुष्कवैरं शुष्कतर्कं च कदापि केनापि सह न करणीयम्।

ज्ञानसरित्

श्यामः पटेलः

चलभाषस्य विकासयात्रा – पुरा सन्देशं प्रेषयितुं जनानां मध्ये पत्रव्यवहारः भवति स्म। तस्मिन् अधिकः कालः गच्छति स्म। अद्यत्वे तु वयं सन्देशार्थं पत्रव्यवहारान् न कुर्मः। तस्य स्थाने दूरवाण्याः चलभाषस्य वा प्रयोगं कुर्मः। येन विना विलम्बेन वार्तालापः भवति। किन्तु भवन्तः जानन्ति यत् दूरवाणीतः चलभाषपर्यन्ता कीदृशी यात्रा आसीत्? चलन्तु। तत् सर्वं ज्ञातुं यतामहे। ख्रिस्ताब्दस्य १८७६ तमे वर्षे एलेक्झाण्डर-ग्रेहाम-बेलमहोदयेन दूरवाण्याः अन्वेषणं कृतम्। तदनु ख्रिस्ताब्दस्य १९०० तमे वर्षे दूरवाण्यां 'लोडिंग कोईल्स' इत्यस्य प्रयोगेण दूरवर्तिसंवादः शक्यः अभवत्। तदन्तरं १९०४ तमे वर्षे 'वेक्युम डियोड' इत्यस्य गवेषणा जाता। अतः दूरवाण्या अन्ताराष्ट्रीयः वाग्व्यवहारः आरब्धः। १९१५ तमे वर्षे अमेरिकादेशस्य न्यूयॉर्कनगरात् आरभ्य सान-फ्रान्सिस्कोनगरपर्यन्तं केबल इत्यस्य स्थापनं जातम्। यस्मिन् १,३०,००० यावन्तः स्तम्भाः आसन् तथा च २५०० टनमितस्य ताम्रधातुनिर्मिततन्तोः प्रयोगः अभवत्। एतावत्कालपर्यन्तं दूरवाण्या सम्पर्कं साधयितुं मध्यस्थानाम् आवश्यकता भवति स्म। किन्तु १९१९ तमात् वर्षात् तु कोपि जनः स्वयमेव वृत्ताकारसंख्याचक्रेण इष्टस्य जनस्य सम्पर्कं कर्तुं शक्नोति स्म। १९२० तमे वर्षे एकया दूरवाण्या अनेकैः सह वार्तालापः शक्यः जातः। १९४७ तमे वर्षे समग्रे विश्वे दूरवाण्याः उपभोक्तारः वर्धिताः। अतः सप्त-अङ्कात्मको दूरवाणीक्रमाङ्कः अपि आरब्धः। तदनु १९५१ तमे वर्षे मध्यस्थं विना दूरवाण्या अन्ताराष्ट्रीयः संवादः आरब्धः। १९५६ तमे वर्षे अमेरिकायूरोपमहाद्वीपयोः दूरवाणीसेवा आरब्धा। तदर्थम् एटलान्टिकसमुद्रे केबल इत्यस्य स्थापनं कृतम् आसीत्। १९६२ तमे वर्षे तु मानवनिर्मितस्त उपग्रहस्य माध्यमेन सम्प्रसारणं प्रारब्धम्। १९६३तमे वर्षे तु वृत्ताकारसङ्ख्याचक्रस्य स्थानं सङ्ख्यापट्टेन गृहीतम्। तदनन्तरम् अमेरिकादेशस्य शिकागोनगरे 'सेल्युलर' इत्यस्य व्यवस्थायाः अपि आरम्भः जातः यस्यां द्विसहस्रेण उपभोक्तृभिः प्रयोगः कृतः। अन्ते १९९० तः चलभाषस्य प्रयोगः अविच्छिन्नरूपेण अद्यावधि वर्धमानोऽस्ति।

शब्दमञ्जूषा

प्रयाणकम्	यात्रा	a journey
निदर्शितः	प्रदर्शित	shown
किलिञ्जम्	चटाई	a mat
नियुद्धम्	पैदल युद्ध करना	fighting on foot
अनुनयः	मनावन	conciliation
प्रवगः	बंदर	monkey
विद्विष्टः	घृणित	hated
ओल्लम्	आर्द्र	wet
शकुनम्	सगुन	omen
मञ्जरिः	अंकुर	sprout
कामुकः	इच्छुक	desirous
मादः	नशा	Intoxication
किण्वम्	पाप	sin
घृणिः	गर्मी	heat
विशायः	बारी-बारी से सोना	sleeping in rotation

किं भवन्तः जानन्ति ?

१) मिंजरमेला त्रिलोकीनाथमेला च हिमाचलप्रदेशे कस्मिन् स्थले भवति ?
(क) शिमलायाम् (ख) चम्बायाम् (ग) मण्ड्याम् (घ) धर्मशालायाम्

२) गढ़मुक्तेश्वरस्य प्रसिद्धमेला कस्यां तिथौ आयोज्यते ?
(क) कार्त्तिकपूर्णिमायाम् (ख) कार्त्तिकामावस्यायाम्
(ग) आश्विनपूर्णिमायाम् (घ) श्रावणपूर्णिमायाम्

३) कार्त्तिकपूर्णिमायाम् आयोज्यमाणः 'ददरीमेला' उत्तरप्रदेशस्य कस्मिन् जनपदे आयोज्यते ?
(क) वाराणस्याम् (ख) इलाहाबादे (ग) कानपुरे (घ) बलियायाम्

४) कजरीमेला प्रमुखतः कुत्र आयोजिता भवति ?
(क) देहल्याम् (ख) पटनायाम् (ग) मिर्जापुरे (घ) भोपाले

५) 'गुड़ियो का मेला' कुत्र आयोज्यते ?
(क) कानपुरे (ख) लखनऊनगरे (ग) उन्नावे (घ) इलाहबादे

६) 'तकिया का मेला' कुत्र आयोज्यते ?
(क) मिर्जापुरे (ख) वाराणस्याम् (ग) मुरादाबादे (घ) उन्नावे

उत्तराणि – (१) ख (२) ग (३) घ (४) ग (५) घ (६) घ

संस्कृत-लिटरेचर फेस्टिवल





प्रियवाचकाः

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006